# Shri Hari Prarthana Stotram

# શ્રીહરિપ્રાર્થનાસ્તોત્રમ્

## Document Information

Text title : Shri Hari Prarthana Stotram

File name : hariprArthanAstotram.itx

Category : vishhnu, svAminArAyaNa, krishna, stotra

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીહરિપ્રાર્થનાસ્તોત્રમ્

(લલિત છન્દ)
અતિ-મનોહરં સર્વ-સુન્દરં
તિલકલક્ષણં ચઞ્ચલેક્ષણમ્ ।
વિબુધવન્દિતં સ્વામિનાથ તે
વપુરિહાસતુ નો નિત્યદર્શને ॥ ૧॥

મદન-મોહનં પ્રેમ-દોહનં
નયનગોચરં ભક્તસઞ્ચરમ્ ।
ભુવિ સુદુર્લભં સ્વામિનાથ તે
વપુરિહાસ્તુ નો નિત્યદર્શને ॥ ૨॥

નિજજનૈઃ સદા વાઞ્છિતં હૃદા
પરસુખાવહં હૃત્તમોપહમ્ ।
પરમ-મઙ્ગલં સ્વામિનાથ તે
વપુરિહાસ્તુ નો નિત્યદર્શને ॥ ૩॥

હૃદય-રોચનં બદ્ધ-મોચનં
વિગતશોચનં દીર્ઘલોચનમ્ ।
મૃદુ-સિતામ્બરં સ્વામિનાથ તે
વપુરિહાસ્તુ નો નિત્યદર્શને ॥ ૪॥

મધુર-ભાષણં પુષ્પ-ભૂષણં
વિજિતદૂષણં શોકશોષણમ્ ।
પ્રહસદાનનં સ્વામિનાથ તે
વપુરિહાસ્તુ નો નિત્યદર્શને ॥ ૫॥

કુસુમ-શેખરં કોમલાન્તરં
સદય-દર્શનં દુઃખકર્શનમ્ ।
વિધિહરાર્ચિતં સ્વામિનાથ તે

વપુરિહાસ્તુ નો નિત્યદર્શને ॥ ૬॥

પરમ-પાવનં લોક-ભાવનં
કુટિલ-કુન્તલં પુષ્પકુણ્ડલમ્ ।
ભવભયાપહં સ્વામિનાથ તે
વપુરિહાસ્તુ નો નિત્યદર્શને ॥ ૭॥

સકલસિદ્ધિભિઃ સર્વઋદ્ધિભિઃ
શ્રિતપદં સદા યોગિભિર્મુદા ।
તદિદમેવ હિ સ્વામિનાથ તે
વપુરિહાસ્તુ નો નિત્યદર્શને ॥ ૮॥

તવ નિવાસતો દુર્ગપત્તનં
જયતિ ભૂતલે સર્વતોઽધિકમ્ ।
ભવદુપાશ્રયાત્ મુક્તિરત્ર યદ્
વસતિ સર્વદાન્યત્રદુર્લભા ॥ ૯॥

કુપથ-દુર્વનાદ્ ઘોરયૌવનાદ્
રસનવૃશ્ચિકાત્ લોભલુબ્ધકાત્ ।
બહુતરાપદો ભૂરિ સમ્પદો
મુહુરિહ ત્વયા રક્ષિતા વયમ્ ॥ ૧૦॥

પ્રબલ-સંશયાદ્ દુષ્ટસંશ્રયાન્
મદબિલેશયાત્ કુત્સિતાશયાત્ ।
સ્મરસરીસૃપાન્ માનકોણપાન્
મુનિપતે વયં રક્ષિતા સ્ત્વયા ॥ ૧૧॥

અશુભ-ભાવતઃ ક્રોધદાવતો
મૃતિજનુર્ભયાત્ પાપદુર્નયાત્ ।
મધુમહાવિષાત્ સર્વથામિષાદ્
યતિપતે વયં રક્ષિતાસ્ત્વયા ॥ ૧૨॥

વિષયવારિધે સ્તારિતા યથા
કરુણયા વયં ભૂરિશસ્તથા ।
તવપદામ્બુજા-સક્તિવિઘ્નતઃ
સતતમેવ નઃ પાતુમર્હસિ ॥ ૧૩॥

કવચન માનસં ત્વત્પદામ્બુજાદ્
વ્રજતુ માન્યતો નાથ નઃ સદા ।
ઇતિ વયં મુહુઃ પ્રાર્થયામહે
નિજજનપ્રિયં ત્વામધીશ્વરમ્ ॥ ૧૪॥

ઇતિ શ્રીશતાનન્દમુનિમુનિવિરચિતં શ્રીહરિપ્રાર્થનાસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Hari Prarthana Stotram*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*